# Brahmana Proktam Vishnoh Gunadivarnanam

# બ્રહ્મણા પ્રોક્તં વિષ્ણોઃ ગુણાદિવર્ણનમ્

## Document Information

Text title : Brahmana Proktam Vishnoh Gunadivarnanam

File name : brahmaNAproktaMviShNoHguNAdivarNanam.itx

Category : vishhnu, vishnu, mahAbhArata

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : mahAbhArata | shAntiparva | adhyAya 339/1-18||

Latest update : November 15, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 15, 2025

*sanskritdocuments.org*

# બ્રહ્મણા પ્રોક્તં વિષ્ણોઃ ગુણાદિવર્ણનમ્

બ્રહ્મોવાચ ।
શ્ૃણુ પુત્ર યથા હ્યેષ પુરુષઃ શાશ્વતોઽવ્યયઃ ।
અક્ષયશ્ચાપ્રમેયશ્ચ સર્વગશ્ચ નિરુચ્યતે ॥ ૧॥

ન સ શક્યસ્ત્વયા દ્રષ્ટું મયાન્યૈર્વાપિ સત્તમ ।
સગુણો નિર્ગુણો વિશ્વો જ્ઞાનદૃશ્યો હ્યસૌ સ્મૃતઃ ॥ ૨॥

અશરીરઃ શરીરેષુ સર્વેષુ નિવસત્યસૌ ।
વસન્નપિ શરીરેષુ ન સ લિપ્યતિ કર્મભિઃ ॥ ૩॥

મમાન્તરાત્મા તવ ચ યે ચાન્યે દેહસંજ્ઞિતાઃ ।
સર્વેષાં સાક્ષિભૂતોઽસૌ ન ગ્રાહ્યઃ કેનચિત્ક્વચિત્ ॥ ૪॥

વિશ્વમૂર્ધા વિશ્વભુજો વિશ્વપાદાક્ષિનાસિકઃ ।
એકશ્ચરતિ ક્ષેત્રેષુ સ્વૈરચારી યથાસુખમ્ ॥ ૫॥

ક્ષેત્રાણિ હિ શરીરાણિ બીજાનિ ચ શુભાશુભે ।
તાનિ વેત્તિ સ યોગાત્મા તતઃ ક્ષેત્રજ્ઞ ઉચ્યતે ॥ ૬॥

નાગતિર્ન ગતિસ્તસ્ય જ્ઞેયા ભૂતેન કેનચિત્ ।
સાઙ્ખ્યેન વિધિના ચૈવ યોગેન ચ યથાક્રમમ્ ॥ ૭॥

ચિન્તયામિ ગતિં ચાસ્ય ન ગતિં વેદ્મિ ચોત્તમામ્ ।
યથાજ્ઞાનં તુ વક્ષ્યામિ પુરુષં તં સનાતનમ્ ॥ ૮॥

તસ્યૈકત્વં મહત્ત્વં હિ સ ચૈકઃ પુરુષઃ સ્મૃતઃ ।
મહાપુરુષશબ્દં સ બિભર્ત્યેકઃ સનાતનઃ ॥ ૯॥

એકો હુતાશો બહુધા સમિધ્યતે એકઃ સૂર્યસ્તપસાં યોનિરેકા ।
એકો વાયુર્બહુધા વાતિ લોકે મહોદધિશ્ચામ્ભસાં યોનિરેકઃ ।
પુરુષશ્ચૈકો નિર્ગુણો વિશ્વરૂપ સ્તં નિર્ગુણં પુરુષં ચાવિશન્તિ ॥ ૧૦॥

હિત્વા ગુણમયં સર્વં કર્મ હિત્વા શુભાશુભમ્ ।
ઉભે સત્યાનૃતે ત્યક્ત્વા એવં ભવતિ નિર્ગુણઃ ॥ ૧૧॥

અચિન્ત્યં ચાપિ તં જ્ઞાત્વા ભાવસૂક્ષ્મં ચતુષ્ટયમ્ ।
વિચરેદ્યો યતિર્યત્તઃ સ ગચ્છેત્પુરુષં પ્રભુમ્ ॥ ૧૨॥

એવં હિ પરમાત્માનં કેચિદિચ્છન્તિ પણ્ડિતાઃ ।
એકાત્માનં તથાત્માનમપરેઽધ્યાત્મચિન્તકાઃ ॥ ૧૩॥

તત્ર યઃ પરમાત્મા હિ સ નિત્યં નિર્ગુણઃ સ્મૃતઃ ।
સ હિ નારાયણો જ્ઞેયઃ સર્વાત્મા પુરુષો હિ સઃ ।
ન લિપ્યતે ફલૈશ્ચાપિ પદ્મપત્રમિવામ્ભસા ॥ ૧૪॥

કર્માત્મા ત્વપરો યોઽસૌ મોક્ષબન્ધૈઃ સ યુજ્યતે ।
સ સપ્તદશકેનાપિ રાશિના યુજ્યતે હિ સઃ ।
એવં બહુવિધઃ પ્રોક્તઃ પુરુષસ્તે યથાક્રમમ્ ॥ ૧૫॥

યત્તત્કૃત્સ્નં લોકતન્ત્રસ્ય ધામ વેદ્યં પરં બોધનીયં સ બોદ્ધૃ ।
મન્તા મન્તવ્યં પ્રાશિતા પ્રાશિતવ્યં ઘ્રાતા ઘ્રેયં સ્પર્શિતા સ્પર્શનીયમ્ ॥ ૧૬॥

દ્રષ્ટા દ્રષ્ટવ્યં શ્રાવિતા શ્રાવણીયં જ્ઞાતા જ્ઞેયં સગુણં નિર્ગુણં ચ ।
યદ્વૈ પ્રોક્તં ગુણસામ્યં પ્રધાનં નિત્યં ચૈતચ્છાશ્વતં ચાવ્યયં ચ ॥ ૧૭॥

યદ્વૈ સૂતે ધાતુરાદ્યં નિધાનં તદ્વૈ વિપ્રાઃ પ્રવદન્તેઽનિરુદ્ધમ્ ।
યદ્વૈ લોકે વૈદિકં કર્મ સાધુ આશીર્યુક્તં તદ્ધિ તસ્યોપભોજ્યમ્ ॥ ૧૮॥

દેવાઃ સર્વે મુનયઃ સાધુ દાન્તાસ્તં પ્રાગ્યજ્ઞૈર્યજ્ઞભાગં યજન્તે ।
અહં બ્રહ્મા આદ્ય ઈશઃ પ્રજાનાં તસ્માજ્જાતસ્ત્વં ચ મત્તઃ પ્રસૂતઃ ।
મત્તો જગજ્જઙ્ગમં સ્થાવરં ચ સર્વે વેદાઃ સરહસ્યા હિ પુત્ર ॥ ૧૯॥

ઇતિ મહાભારતે શાન્તિપર્વણિ ૩૩૯ અધ્યાયાન્તર્ગતં
બ્રહ્મણા નારદાય પ્રોક્તં વિષ્ણોઃ ગુણાદિવર્ણનં સમ્પૂર્ણમ્ ।

મહાભારત । શાન્તિપર્વ । અધ્યાય ૩૩૯/૧-૧૮॥

mahAbhArata . shAntiparva . adhyAya 339/1-18..

Proofread by PSA Easwaran

*Brahmana Proktam Vishnoh Gunadivarnanam*

pdf was typeset on November 15, 2025

Please send corrections to *sanskrit@cheerful.com*